# Ramakrishnabhairachitam Shri Svaminarayana Stuti

# રામકૃષ્ણભાઈરચિતં શ્રીસ્વામિનારાયણસ્તુતિઃ

## Document Information

Text title : Ramakrishnabhairachitam Shri Svaminarayana Stuti

File name : rAmakRRiShNabhAIrachitaMshrIsvAminArAyaNastutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti

Location : doc_vishhnu

Author : rAmakRiShNabhAI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# રામકૃષ્ણભાઈરચિતં શ્રીસ્વામિનારાયણસ્તુતિઃ

સર્ગસ્થાનલયાદિકારણમહો કાન્તિચ્છટા ભાસ્વરં
ભીતિવ્રાતહરં વરેણ્યવિભવં કારુણ્યપાથોનિધિમ્ ।
પૃથ્વીભારહરં પ્રપન્નવરદં તાપત્રયોન્મૂલકં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રી સ્વામિનારાયણમ્ ॥ ૧॥

જીવેશાક્ષરમુખ્યતત્ત્વનિચયાદૂર્ધ્વે વ્યોમન
માયાસંસૃતિબન્ધાનાત્ પરતરે ધાન્યક્ષરે સંસ્થિતમ્ ।
દિવ્યે પીઠવરે નિજૈરનુદિનં મુક્તવ્રજૈઃ સેવિતં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રી સ્વામિનારાયણમ્ ॥ ૨॥

બ્રહ્માણ્ડાધિપતિં મુનીન્દ્રવિનુતં વન્દારુવૃન્દાર્ચિતં
અષ્ટૈશ્વર્યવિભૂષિતં વરરુચં મુક્તાવલીશ
અષ્ટાઙ્ગાહિતયોગિસંસ્તુતપદં યોગીશ્વરં મુક્તિદં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રી સ્વામિનારાયણમ્ ॥ ૩॥

સમ્પ્રત્યૌદ્ધવમાર્ગરક્ષણપરં શ્રીપઞ્ચદેવાત્મજં
ભૂમાનન્દવચોઽમૃતૈઃ સકલભૂકલ્યાણદં ભૂતિદમ્ ।
સત્સઙ્ગાશ્રિતવલ્લભં પ્રતિદિનં ભક્તાર્ચિતાઙ્ઘ્રિદ્વયં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રી સ્વામિનારાયણમ્ ॥ ૪॥

સંસારોત્થિતસર્વભીતિશમનં સૌભાગ્યવારાન્નિધિં
માઙ્ગલ્યામ્બુધિમન્વહં પ્રણમતાં સત્સઙ્ગિનાં જીવનમ્ ।
ધ્યાતૃણાં સુખહેતવે વિદધતં નાનાવિધં ચેષ્ટિતં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રીસ્વામિનારાયણમ્ ॥ ૫॥

ચેતઃ શાન્તિકરં મનોમલહરં પાપેભપઞ્ચાનનં
ભક્તેષ્ટાભયદં કૃપાર્દ્રહૃદયં ક્લેશાગ્નિસંવારકમ્ ।
આધિવ્યાધિહરં પ્રશાન્તલલિતં જ્ઞાનપ્રકર્ષપ્રદં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રીસ્વામિનારાયણમ્ ॥ ૬॥

પદ્મસ્પર્ધિકરં પ્રસન્નવદનં પાદાવધૂતામ્બુજં
દીનાનુગ્રહકાતરં મધુમયં સદ્ભક્તસેવાપ્રિયં
સંસારાર્ણવપારદં પરતરં કષ્ટાર્ત્યનિષ્ટાપહં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રીસ્વામિનારાયણમ્ ॥ ૭॥

તમીશં ભુવિ સેવિતાઙ્ઘ્રિયુગલં સદ્ભક્તવૃન્દૈઃ સદા
નૌમીડ્યં પરમેષ્ઠિનં ગુણનિધિં શ્રીનીલકણ્ઠં પ્રભુમ્ ।
શ્રીલં કારણકારણં નરતનું સૌખ્યપ્રદં સ્વામિનં
વન્દે ત્વાં પુરુષોત્તમં સુખનિધિં શ્રીસ્વામિનારાયણમ્ ॥ ૮॥

ઇતિ રામકૃષ્ણભાઈરચિતં શ્રીસ્વામિનારાયણસ્તુતિઃ સમાપ્તા ।

---

*Ramakrishnabhairachitam Shri Svaminarayana Stuti*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*